गरुडोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

गारुडविद्यासंप्रदायः

ॐ गारुडब्रह्मविद्यां प्रवक्ष्यामि यां [1]ब्रह्मा विद्यां नारदाय प्रोवाच नारदो बृहत्सेनाय बृहत्सेन इन्द्राय इन्द्रो भरद्वाजाय भरद्वाजो जीवत्कामेभ्यः शिष्येभ्यः प्रायच्छत् ॥ १ ॥

विषं ब्रह्मातिरिक्तं स्यादमृतं ब्रह्ममात्रकम् ।
ब्रह्मातिरिक्तविषहृद्ब्रह्ममात्रखगोऽहम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं स्वाज्ञानपन्नगगारुडोपनिषत् निर्विशेषब्रह्मज्ञानसाधनकळेबरप्राणपवनवियोगहेतुपन्नगादिनानाविषजातप्रशमननिपुणगारुडविद्याप्रकटनव्यग्रा परमार्थदृष्ट्या ब्रह्मातिरिक्तविषजातनिर्विषीकरणनिष्प्रतियोगिकब्रह्ममात्रगरुडपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । इयं विद्या ब्रह्मादिभरद्वाजान्तपारंपर्येणागतेति सूक्तिः विद्यास्तुत्यर्था । तत्परंपरामनुक्रामति—ओमिति । ओङ्कारलक्ष्यार्थनिष्पन्नं परं ब्रह्म स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्यत्र न हि संशयोऽस्ति । ओङ्कारवाच्यार्थनिष्पन्नं अपरं ब्रह्म "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते

[1] ब्रह्म—अ, अ १, क.

शिर:" इति वक्ष्यमाणश्रुतिसिद्धं वैराजतत्त्वमित्यर्थ: । तादृशापरब्रह्मगोचरां गारुडाख्यापरब्रह्मविद्यां प्रवक्ष्यामीति श्रुतेर्वच: । सेयं विद्या कीदृशी ? इत्यत्र यां इह गारुडापरब्रह्मविद्यां ब्रह्मा नारदाय प्रोवाच इत्यादिपरंपरागतां विद्यां भरद्वाजो मुनि:, "देहे नष्टे कुतो बुद्धि: बुद्धिनाशे कुतो ज्ञता" इति स्मृत्यनुरोधेन निर्विशेषब्रह्मज्ञानोपयोगितया जीवत्कामेभ्य: शिष्येभ्य: प्रायच्छत् इति । अपरब्रह्मविद्याया: परब्रह्माभ्युपायत्वे "शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति" इति श्रुते: ॥ १ ॥

गारुडविद्याया: ऋष्यादि

अस्या: [1]श्रीमहागरुडब्रह्मविद्याया ब्रह्मा ऋषि: । गायत्री छन्द: । श्रीभगवान् महागरुडो देवता । श्रीमहागरुडप्रीत्यर्थे मम सकलविषविनाशनार्थे जपे विनियोग: ॥ २ ॥

ॐ नमो भगवते अङ्गुष्ठाभ्यां नम: । श्रीमहागरुडाय तर्जनीभ्यां स्वाहा । पक्षीन्द्राय मध्यमाभ्यां वषट् । श्रीविष्णुवल्लभाय अनामिकाभ्यां हुम् । त्रैलोक्यपरिपूजिताय कनिष्ठिकाभ्यां वौषट् । उग्रभयंकरकालानलरूपाय करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यास: ॥ ३ ॥

भूर्भुव: सुवरोमिति दिग्बन्ध: ॥ ४ ॥

ध्यानम्—

[2]स्वस्तिको दक्षिणं पादं वामपादं तु कुञ्चितम् ।
प्राञ्जलीकृतदोर्युग्मं गरुडं हरिवल्लभम् ॥

[1] श्रीगारु—उ. [2] स्वस्तिकं—क

अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ।
तक्षकः कटिसूत्रं तु हारः कार्कोट उच्यते ॥
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामके ।
शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे ॥
पाण्ड्रकालिकनागाभ्यां चामराभ्यां सुवीजितम् ।
एलापुत्रकनागाद्यैः सेव्यमानं मुदाऽन्वितम् ॥
कपिलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम् ।
दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम् ॥
आजानुतः सुवर्णाभमाकट्योस्तुहिनप्रभम् ।
कुङ्कुमारुणमा[1]कन्थं शतचन्द्रनिभाननम् ॥
नीलाग्रनासिकावक्त्रं सुमहच्चारुकुण्डलम् ।
दंष्ट्राकरालवदनं किरीटमुकुटोज्ज्वलम् ॥
कुङ्कुमारुणसर्वा[2]ङ्गं कुन्देन्दुधवला[3]ननम् ।
विष्णुवाह नमस्तुभ्यं क्षेमं कुरु सदा मम ॥
एवं ध्यायेत्त्रिसंध्यासु गरुडं नागभूषणम् ।
विषं नाशयते शीघ्रं तूलराशिमिवानलः ॥ ५ ॥

गारुडापरब्रह्मविद्यायाः ऋषिछन्दोदेवताऽऽदिकमाह—अस्या इति॥२–४॥ **हरिवल्लभं** हरिरेव वल्लभः स्वामी यस्य तं हरिवल्लभम् । अधिकारिभावनानुरोधेन सर्पादेः स्वातिरिक्तस्य च विषं नाशयते ॥ ५ ॥

[1] कन्धं—अ २, स्कन्धं—अ, अ १. [2] ङ्गकु—अ १, उ, क.
[3] नन—अ १, उ, क.

गरुडमालामन्त्रादि

[1]ओमीमों नमो भगवते श्रीमहागरुडाय पक्षीन्द्राय विष्णुवल्लभाय त्रैलोक्यपरिपूजिताय उग्रभयंकरकालानलरूपाय वज्रनखाय वज्रतुण्डाय वज्रदन्ताय वज्रदंष्ट्राय वज्रपुच्छाय वज्रपक्षालक्षितशरीराय ओमीमेह्येहि श्रीमहागरुडाप्रतिशासनास्मिन्नाविशाविश दुष्टानां विषं दूषय दूषय स्पृष्टानां विषं नाशय नाशय दन्दशूकानां विषं दारय दारय प्रलीनं विषं प्रणाशय प्रणाशय सर्वविषं नाशय नाशय हन हन दह दह पच पच भस्मीकुरु भस्मीकुरु हुं फट् स्वाहा ॥ ६ ॥

चन्द्रमण्डलसंकाश सूर्यमण्डलमुष्टिक । पृथ्वीमण्डलमुद्राङ्ग श्रीमहागरुड विषं हर हर हुं फट् स्वाहा ॥ ७ ॥

ॐ क्षिप स्वाहा ॥ ८ ॥

ओमीं स चरति स चरति [2]तत्कारि मत्कारि विषाणां च विषरूपिणी विषदूषिणी विष[3]शोषणी विषनाशिनी विषहारिणी हतं विषं नष्टं विषमन्तः प्रलीनं विषं प्रनष्टं विषं हतं ते ब्रह्मणा विषं हतमिन्द्रस्य वज्रेण स्वाहा ॥ ९ ॥

ॐ नमो भगवते महागरुडाय विष्णुवाहनाय त्रैलोक्यपरिपूजिताय वज्रनखवज्रतुण्डाय वज्रपक्षालंकृतशरीराय एह्येहि महागरुड विषं छिन्धि छिन्धि आवेशयावेशय हुं फट् स्वाहा ॥ १० ॥

[1] ओं रं ओं—अ १. ओं रां ओं—क.

[2] तत्कारी मत्कारी—मु. (एवमुत्तरत्र).

[3] शोषिणी—अ २, उ. (एवमुत्तरत्र).

सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्णियाः शफा यजूंषि नाम। सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः पत ॥ ११ ॥

ओमीं ब्रह्मविद्याममावा[1]स्यायां पुरोवाच स चरति स चरति तत्कारि मत्कारि विषनाशिनी विष[2]दूषिणी विषहारिणी हतं विषं नष्टं विषं प्रणष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १२ ॥

[3]तत्क्ष्यम् । यद्यनन्तकदूतोऽसि यदि वाऽनन्तकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा। विषमिन्द्रस्य वज्रेण स्वाहा ॥ १३ ॥

यदि वासुकिदूतोऽसि यदि वा वासुकिः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १४ ॥

यदि तक्षकदूतोऽसि यदि वा तक्षकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं

[1] स्यां—अ १, अ २, क. [2] दूषणी—उ. (एवमुत्तरत्र).
[3] 'तत्' इति (उ) कोशे नास्ति.

हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १५ ॥

यदि कर्कोटकदूतोऽसि यदि वा कर्कोटकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १६ ॥

यदि पद्मकदूतोऽसि यदि वा पद्मकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १७ ॥

यदि महापद्मकदूतोऽसि यदि वा महापद्मकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १८ ॥

यदि शङ्खकदूतोऽसि यदि वा शङ्खकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १९ ॥

यदि गुलिकदूतोऽसि यदि वा गुलिकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं

नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २० ॥

यदि पौण्ड्रकालिकदूतोसि यदि वा पौण्ड्रकालिकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २१ ॥

[1]यदि नागकदूतोऽसि यदि वा नागकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २२ ॥

यदि लूतानां प्रलूतानां यदि वृश्चिकानां यदि घोटकानां यदि स्थावरजङ्गमानां स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २३ ॥

अनन्तवासुकितक्षककर्कोटकपद्मकमहापद्मकशङ्खकगुलिकपौण्ड्रकालिकनागक इत्येषां दिव्यानां महानागानां महानागादिरूपाणां विषतुण्डानां विषदन्तानां विषदंष्ट्राणां विषाङ्गानां विषपुच्छानां विश्वचाराणां वृश्चिकानां लूतानां प्रलूतानां मूषिकाणां गृहगौलिकानां गृहगोधिकानां घ्रणासानां गृहगिरिगह्वरकालानलवल्मीकोद्भूतानां

[1] अयं (२२) पर्यायः मुद्रितकोश एव दृश्यते.

तार्णानां पार्णानां काष्ठदारुवृक्षकोटररतानां मूलत्वग्दारुनिर्यासपत्रपुष्पफलोद्भूतानां दुष्टकीटकपिश्वानमार्जारजम्बूकव्याघ्रवराहाणां जरायुजाण्डजोद्भिज्जस्वेदजानां शस्त्रबाणक्षतस्फोटव्रणमहाव्रणकृतानां कृत्रिमाणामन्येषां भूतवेतालकूष्माण्डपिशाचप्रेतराक्षसयक्षभयप्रदानां विषतुण्डदंष्ट्राणां विषाङ्गानां विषपुच्छानां विषाणां विषरूपिणी विषदूषिणी विषशोषिणी विषनाशिनी विषहारिणी हतं विषं नष्टं विषमन्तःप्रलीनं विषं प्रणष्टं विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २४ ॥

गरुडमालामन्त्रमूलमन्त्रादिकमाह—ओमिति ॥ ६ ॥ वर्णतः चन्द्रमण्डलसंकाश। विराडात्मना यस्य मुष्टौ सूर्यमण्डलं विद्यते तस्य सम्बुद्धिः सूर्यमण्डलमुष्टिक ॥ ७–१० ॥ छन्दोमयाङ्गविराडादिरूपेण गरुडं स्तौति सुपर्णोऽसीति। गरं नानाविषजातं उन्मूल्य आत्मसात्करोतीति गरुत्मान् गरुत्मन् सुष्ठु शोभनौ पर्णौ पक्षौ यस्य स त्वं सुपर्णोऽसि विराडादिभावमापन्नस्य ते तव त्रिवृत् स्तोत्रीयानवकं शिरो भवति। गायत्रं सामैव ते चक्षुः भवति। तव आत्मा मध्यशरीरं अवशिष्टस्तोमसहस्रं भवति। वामदेव्यं साम ते तनूः भवति। बृहच्च रथन्तरं च बृहद्रथन्तरे सामनी ते पक्षौ भवतः। ते पुच्छं यज्ञायज्ञियं साम भवति। नानाछन्दांसि तव अङ्गानि भवन्ति। तव विश्रमणहेतुधिष्णिया अपि छन्दांस्येव भवन्तीत्यर्थः। तव शफाः खुरा यजूंषि ऋचश्च भवन्ति। अनुक्ताङ्गमथर्वणवेदो भवतीति वेदितव्यम्। यतस्त्वं गरुत्मान् सुपर्णोऽसि अतः त्वं दिवं गच्छ सुवः पत इति सुवर्ग्रहणं चतुर्दशभुवनस्योपलक्षणार्थं, विराट्सूत्रेश्वरात्मना सर्वव्यापको भवेत्यर्थः। सुपर्णगतविशेषांशापाये सुपर्णस्य निर्विशेषब्रह्मरूपत्वं सिद्धमित्यर्थः ॥ ११–१२ ॥ तत् स्त्र्यं विषहरबीजम् ॥ १३–२३ ॥ किं बहुना—अनन्तेति ॥ २४ ॥

य इमां ब्रह्मविद्याममावा[1]स्यायां पठेच्छृणुयाद्वा यावज्जीवं न हिंसन्ति सर्पाः । अष्टौ ब्राह्मणान् ग्राहयित्वा तृणेन मोचयेत् । शतं ब्राह्मणान् ग्राहयित्वा चक्षुषा मोचयेत् । सहस्रं ब्राह्मणान् ग्राहयित्वा मनसा मोचयेत् । सर्पान् जले न मुञ्चन्ति । तृणे न मुञ्चन्ति । काष्ठान् मुञ्चन्तीत्याह भगवान् ब्रह्मेत्युपनिषत् ॥ २९ ॥

एवं अपरब्रह्मविद्यया सर्पादिविषतो भीतिमुत्सृज्य निर्विशेषब्रह्मज्ञानसाधनानुष्ठाननिष्पन्नब्रह्मविद्याप्रादुर्भावसमकालं विद्वान् ब्रह्मातिरिक्तसामान्यविषग्रासनिष्प्रतियोगिकब्रह्ममात्रामृतरूपेण अवशिष्यत इत्यर्थः । इत्युपनिषच्छब्दः गरुडोपनिषत्परिसमाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
गरुडोपनिषद्व्याख्या लिखितेश्वरगोचरा ।
गरुडोपनिषद्व्याख्याग्रन्थोऽशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्व्यधिकशतसङ्ख्यापूरकं गरुडोपनिषद्विवरणं सम्पूर्णम् ॥

---

[1] स्यां—अ १, अ २, क, उ.